Shri Raghunatha Temple MSS. Library,
JAMMU

No. १००० - घ

Title श्री भागवते ब्रह्मस्तुतितत्त्वदीपिका

Author

Extent ११ Age

Subject पुराणम् · अपूर्णम्

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नं० १०००-ध

श्रीभागवते ब्रह्मस्तुतिः सव्याख्या (पुराणम्)

तत्वदीपिका

पत्राणि ११ (अपूर्णम्)

१०००

११ पत्राणि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

॥१॥ ॥श्रीमते रामानुजाय नमः॥ श्रीनिवासांघ्रिदासेन नत्वा श्रीयतिशेखरं भव्याब्रह्मस्तुतेर्व्याख्या क्रियते तत्त्वदी-

ब्र·स्त·दी· पिका १ अथ स्वस्य सर्वोत्पादकत्वागतपितामहत्वाभिमानरूपस्वातंत्र्येण विस्मृतपरशेषतैकस्वरूपतया भ-

गवति प्रकटितां स्वमायित्वेन पूर्वं स्वकृतापराधतया सभयः कंपमानो ज्ञातभगवच्छेषतैकरूपपार-

तंत्र्यस्तन्महिम्न इयत्तां वक्तुमशक्यतया स्वस्यानभिज्ञत्वं ख्यापयन्स्वापराधं क्षमापयंश्चेदानीं यथा-

दृष्टस्वरूपं श्रीकृष्णं स्तौतीति नोमीति हे इड्य स्तुत्य ते तुभ्यं नोमि कारकाणां वैवक्षिकत्वाद्द्वितीयार्थे चतुर्थी मि

॥श्रीमते रामानुजाय नमः॥ नोमीड्य तेऽभ्रवपुषे तडिदंबराय गुंजावतंसपरिपिच्छलसन्मुखाय

वन्यस्रजे कवलवेत्रविषाणवेणुलक्ष्मश्रिये मृदुपदे पशुपांगजाय॥१॥

त्यर्थः यद्वा इतः पूर्वं सर्वेश्वरोऽहमेवेत्येवंरूपस्वातंत्र्यात् विस्मृतत्वच्छेषतैकस्वरूपो भवामिति कृतापराधो

जातः इदानीं तु त्वत्कृपयाप्तजातत्वच्छेषत्वज्ञानस्त्वामनुकूलयितुं नौमीत्युच्यते इत्यर्थः अथवा नो-

मीत्यत्रायमाशयः ममेयं नमस्क्रिया तुभ्यमेवास्तु तत्कुतस्त्वैव निरूपाधिकनंतव्यत्वात् अस्मदा-

दीनां सर्वेषां निरूपाधिकनंतत्वात् तथा हारीतः नंतव्यः परमः शेषी शेषा नंतार ईरिता इति अन्यत्रापि दास-

[illegible]ताः स्वतः सर्वे ह्यात्मानः परमात्मनः नान्यथा लक्षणं तेषां बंधे मोक्षे तथैव च स्वत्वमात्मनि संजातं स्वामि-

[illegible]ह्मणि स्थितं स्वोज्जीवनेच्छा यदि ते स्वसत्तायां स्पृहा यदि आत्मदास्यं हरेः स्वाम्यं स्वभावं च सदा स्मरेति

च प्रह्लादवाक्यं श्रीनृसिंहं प्रति अहं त्वकामस्त्वद्भक्तस्त्वं च स्वाम्यनपाश्रय इति अनपाश्रयो नि ॥२॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

रुपाधिक इत्यर्थः अत्रापि अग्रे एव दर्पतिस्त्वयं तदस्तु मे नाथ स भूरिभागो भवेऽत्र वान्यत्र तु वा तिरश्चां येनाहमे
कोपि भवज्जनानां भूत्वा निषेवे तव पादपल्लवमिति अतो ब्रह्मण ईश्वरजीवयोः पारमार्थिकं भेदज्ञानं संजा
तमिति तं स्तोतीति ये पुनर्जीवेश्वरयोरौपाधिकभेदं स्वीकृत्य तन्निवृत्तये पारमार्थिकाभेदज्ञानमेवेति व
दंति ते प्रष्टव्याः अयं चतुर्मुखः संजातपारमार्थिकाभेदज्ञानो न वा नाद्यः पक्षः पारमार्थिकाभेदज्ञानिनो भेदपू
र्वकस्तुत्यभावात् न च नष्टस्य भेदज्ञानस्यानुवृत्तिर्वक्तुं शक्यते ज्ञानोत्तरकाले तस्या अनुदयात् द्विचंद्रज्ञा
नादौ तु पारमार्थिकदोषस्याविद्यमानत्वादनुवृत्तिर्युक्ता सा च पारमार्थिकचंद्रैकज्ञानादकिंचित्करा॥
इह तु सकारणस्य सकार्यस्य चाज्ञानस्य पारमार्थिकाभेदज्ञानविनष्टत्वान्न कथंचिदनुवृत्तिरिति नापि
द्वितीयः तस्य पारमार्थिकाभेदज्ञानशून्यतया तत्पूर्वकस्वकृतस्तुतिवाक्यानां श्रीमद्भिरपि पारमार्थिकाभेदज्ञा
नत्वेन व्याख्यातानां नारायणस्त्वं न हि सर्वदेहिनां एकस्त्वमात्मा पुरुषः पुराणः सत्यः स्वयंज्योतिरनंत आ
द्यः नित्योऽक्षरोऽजस्रसुखो निरंजनः पूर्णोऽद्वयो मुक्त उपाधितोऽमृतः इत्यादीनां प्रलापापत्तेरविश्वसनी
यत्वाच्च कुतः अस्तोतृत्वात् अतो जीवेश्वरयोर्निरुपाधिकस्वरूपभेदज्ञानमेवास्य जातमिति मत्वा स्तौ
तीति स्वस्य परमात्मात्मकत्वं तु नारदाय स्वेनैवोक्तं द्वितीये सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः विश्वं
पुरुषरूपेण परिपाति त्रिशक्तिधृगिति न च भेदस्याज्ञत्वपक्षसिद्धत्वेनानुवादमात्रमिदमिति वक्तुमुचि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

॥२॥ तं स्वनिष्ठत्वेन प्रतीयमाने पि ईश्वरोहं ब्राह्मणोहमित्यादि भेदे तन्नियाम्यत्वतद्रूपत्वतदल्पत्वादीनां प्र
ब्र·सटी· त्येकगोचरत्वेनाननुवादत्वात् तथा च श्रुतयः ज्ञाज्ञौ द्वावजावीशनीशौ द्वा सुपर्णा पृथगात्मानं प्रेरिता
रं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति अन्तरं ब्रह्मविदो विद्या प्रधानक्षेत्रज्ञपतिर्गुणेशः इत्यादयः तथा
च सूत्रकारः भेदव्यपदेशाच्चान्यः अधिकं तु भेदनिर्देशात् स्थित्यदनाभ्यां च अधिकोपदेशात्तु बादराय
णस्यैवं तद्दर्शनात् भोगमात्रसाम्यलिंगाच्चेत्यादिसूत्रैर्निरुपाधिकस्वरूपभेदमेव निश्चिनोतीति
स्मृतयोपि यस्मात्क्षरमतीतोहमक्षरादपि चोत्तमः अतोस्मि लोके वेदे च प्रथितः पुरुषोत्तमः
एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जगदि
त्यादयो भेदमेव प्रतिपादयंतीति अभेदवादास्तु सर्वस्य ब्रह्मनिष्ठत्वेन तच्छरीरत्वेनोपपन्नाः
सर्वं खल्विदं ब्रह्म तत्त्वमस्ययमात्मा ब्रह्मेत्यादिभिरिति अत एव सामानाधिकरण्यमपि मु॥
ख्यत्वेनैवोपपन्नं अतोस्य स्वाभाविकं नंतृनंतव्यसंबंधज्ञानमुत्पन्नं अतः स्वकृतापराधनि
तः संसृतिमापयति नो मीति अतो यथोक्त एवार्थः समीचीनः कथंभूताय तुभ्यं अभ्रनवपुषे
स्निग्धघननववपुर्यस्य तस्मै तडिदंबराय नीलघनोपरि विद्यमानतडित्वदंबरं यस्य तस्मै गुंजा
वतंसपरिपिच्छलसन्मुखाय गुंजावतंसाभ्यां कर्णभूषणाभ्यां परिपिच्छेन शिरोभूषणेन च
लसन्मुखं यस्य तस्मै वन्यस्रजे वन्याः स्रजो विद्यंते यस्य तस्मै कवलवेत्रविषाणवेणुलक्ष्म ॥२॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

श्रिये कवल्लवेत्रविषाणवेणवएव लक्ष्माणि चिह्नानि तैः श्रीः शोभा यस्य तस्मै मृदुपदे मृदू पादौ यस्य तस्मै प
शुपांगजाय पशून्पाति वृष्ण्यादिना पशुपाद्देवात्तस्यांगाज्जातो यस्य तस्मै यद्वा अयं मम स्वामी श्रीकृष्णः स्वावता
रैश्वर्यकं साद्दिस्योगोपयितुं नंदगोकुले प्रच्छन्न इति ज्ञात्वा वसुदेवात्मजत्वज्ञानवानपि असुराणां निवृत्तिमनसि
विचिंत्य पशुपांगजाय नंदात्मजायेति प्रयुक्तवानिति तथा च श्रुतिः अजायमानो बहुधा विजायते तस्य धीराः
परिजानंति योनिमिति धीरा उपासकास्तस्य योनिं जन्मकारणं जानंतीत्यर्थः तथा च द्वितीये स्वेनैवोक्तं
नारदं प्रति वेदाहमंग परमस्य हि योगमायां यूयं भवश्च भगवानथ दैत्यवर्यः पत्नी मनोः स च मनुश्च तदा
त्मजाश्चेत्यादि ते वै विदंत्यतितरंति च देवमायां स्त्रीशूद्रहूणशबरा अपि पापजीवाः यद्यद्भुतक्रमपराय
णशीलशिक्षास्तिर्यग्जना अपि किमु तश्रुतधारणा ये इत्यंतमिति १ अथ पूर्वाध्यायोक्तं ततः कृष्णो
मुदं कर्तुं तन्मातॄणां च कस्य च उभयायितमात्मानं चक्रे विश्वकृदीश्वरः यावद्वत्सपवत्सकाल्पकवपु
र्यावत्करांघ्र्यादिकमित्यादि सर्वस्वरूपो बभावित्यंतं श्रीकृष्णस्यावताररूपपरिच्छिन्नदिव्यमंगलविग्र
हस्य महिमानमनवगाहमानोऽपरिच्छिन्नसर्वव्यापकसर्वकल्याणगुणनिलयदिव्यविग्रहविशिष्टस्य
महिमानं कैमुत्यन्यायेन सविस्मयेन स्तौति अस्यापीति हे देव अस्यासौ शील्यसौलभ्यादिगुण
विशिष्टस्यापरिच्छिन्नदिव्यविग्रहस्यापरिच्छिन्नं महितु महिमानमवज्ञातुं निश्चेतुं कोपि चतुराननो

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ष्यहं नेशेनसमर्थोभवामि यथाकोपिमत्सदृशः कश्चिदन्योपि नेशेनसमर्थोबभूव किंविशिष्टस्यवपुषः मदनुग्रह
स्येत्युपलक्षणं ममानुग्रहोयस्मात्तत्तस्यस्वाश्रितानुग्रहार्थंगृहीतस्येत्यर्थः तथाचगीतोपनिषदि परित्राणा
यसाधूनांविनाशायचदुष्कृतां धर्मसंस्थापनार्थायसंभवामि युगेयुगेइति स्वेच्छामयस्यस्वस्येच्छास्वेच्छासाप्र
धानायस्मिंस्तस्य तथाचभगवद्वाक्यं अजोपिसन्नव्ययात्मा भूतानामीश्वरोपिसन् प्रकृतिंस्वामधिष्ठाय
संभवाम्यात्ममाययेति प्रकृतिंस्वभावंस्वस्वभावमेवाधिष्ठायस्वीकृत्यमायया स्वसंकल्पेनेत्यर्थः मायाव

अस्यापिदेववपुषोमदनुग्रहस्यस्वेच्छामयस्यनतुभूतमयस्यकोपि नेशेमहित्ववसितुंम॰
नसांतरेणसाक्षात्तवैवकिमुतात्मसुखानुभूतेः २

यनेज्ञानमित्यनुशासनात् संभवामि आविर्भवामि यथास्वीयानामिच्छास्वेच्छातन्मयस्यतथाचवाल्मी
किनोक्तं सहिदेवैरुदीर्णस्यवधार्थिभिः अर्थितोमानुषेलोकेजज्ञेविष्णुःसनातनइति तत्रहेतुमाह न
तुभूतमयस्यनपुनर्भूतमयस्यतस्यभूतमयत्वाभावात् तत्कुतः अव्याकृतदिव्यात्मकस्यतस्यालौ
किकत्वात् आदित्यवर्णंतमसःपरस्तादित्यादिश्रुतेः उपबृंहणमपि नभूतसंघसंस्थानोदेहोस्यपरमात्म
नइति ननुमन्महिमायदिसर्वथादुर्ज्ञेयस्तर्हिकथंज्ञास्यतिकेचिदत्रयइत्यत्राह मनसांतरेणेति
सूक्ष्ममनोविनाज्ञातुंनशक्यतेत्वत्कृपयानिर्मलमनसातुज्ञानंतितेमनसातुविशुद्धेनदृश्यतेत्वग्रया
बुद्ध्यासूक्ष्मयासूक्ष्मदर्शिभिरित्यादिश्रुतेः सूक्ष्ममनोग्राह्यत्वात् तथापिभूमन्महिमागुणस्य ॥३॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

तेविवोढुमर्हत्यमलांतरात्मा इतिवक्ष्यमाणत्वाच्च किमुतसाक्षात्तवैवात्मसुखानुभूतेः स्वज्ञानानंदानुभवतः अं
तर्यामितया सर्वव्यापित्वेनचिदचिच्छरीरिणः तद्विलक्षणस्य सर्वैश्वर्यस्यादिव्यस्वरूपात्मकस्यातवमहिमान
मियत्तयानिश्चेतुंनशक्नोमीति किंवक्तव्यमिति तथाचश्रुतिः वेदाहमेतंपुरुषंमहांतमिति सर्वैश्वर्यभ
तोविग्रह उक्तः तथाचभगवद्वाक्यमर्जुनंप्रति मयाप्रसन्नेनतवार्जुनेदंरूपंपरंदर्शितमात्मयोगा
त् तेजोमयंविश्वमनंतमाद्यंयन्मेत्वदन्येननदृष्टपूर्वमिति २ अतोयेकेवलज्ञौप्रत्यगात्मस्वरूप
ज्ञानेपरिश्रममकृत्वा स्वस्वामिसंबंधज्ञानपूर्वकंत्वच्चरित्रमेवात्यादरेणहृदमेवास्मत्प्राणधारण
मितिमत्वाप्र एवंतितेस्ववशीकृत इत्याह ज्ञानेप्रयासइति हेअजितस्ववशीकृताखिललोकये
त्व[illegible]षतेकस्वरूपज्ञानवंतः केवलप्रत्यगात्मस्वरूपज्ञानेप्रयासमुदपास्यदूरेणत्यक्त्वासद्भिर्मु
खरितांत्वमेवनिरूपाधिकसर्वशेषीतिज्ञानवद्भिः शंसितां भवदीयवार्त्तांत्वदीयचरित्ररूपकथांस्वस्थाने
स्वाश्रमेस्थिताएवश्रुतिगतांश्रवणप्राप्तां यद्वाश्रुतिगतांवेदप्रतिपाद्यांतनुवाङ्मनोभिर्नमंतएवसाष्टांगप्रण
मंकुर्वंतएव तथाचप्रणामलक्षणमुक्तंभाष्यकारैः मनोबुद्ध्यभिमानेनसहन्यस्यधरातले कूर्मवच्च
तुरःपादान्शिरस्तत्रैवपंचमम् इति प्रणमपूर्वमेवत्वत्कथात्तांजीवंतिउपजीवंति स्वप्राणधार
कतयाप्र एवंतीत्यर्थः अत्रज्ञानशब्देनाहंकारशब्दवाच्यप्रत्यगात्मस्वरूपज्ञानंविवक्षितं तथा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

क्षरशब्दवाच्यः प्रत्यगात्मा क्षरं प्रधानममृताक्षरं हरः क्षरात्मनावीशते देव एक इति श्रुत्युक्तः तथा च भगवद्वाक्यमर्जु
नं प्रति मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ये त्वक्षरमनिर्देश्यम
व्यक्तं पर्युपासते सर्वत्रगमचिंत्यं च कूटस्थमचलं ध्रुवमित्युक्त्वा क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसामि
ति ४ क्लेश एव उक्त इति तथा चाक्षरशब्दवाच्यो जीवाद्विलक्षणत्वेनोक्तः परमात्मा कूटस्थोऽक्षर उच्यते उक्त

ज्ञाने प्रयासमुदपास्य नमंत एव जीवंति सन्मुखरितां भवदीयवार्तां स्थाने स्थिताः श्रुतिगतां तनुवा
ङ्मनोभिर्ये प्रायशोऽजितजितोऽप्यसि तैस्त्रिलोक्यां ३ श्रेयः श्रुतिं भक्तिमुदस्य ते विभो क्लिश्यंति ये के
वलबोधलब्धये तेषामसौ क्लेशल एव शिष्यते नान्यद्यथा स्थूलतुषावघातिनां ४

मः पुरुषस्त्वन्य इति तैस्त्वं प्रायशस्त्रिलोक्यामजितोऽपि स्ववशीकृतोऽसि तथा च भगवद्वचनं दुर्वाससं प्रति अ
हं भक्तपराधीनो ह्यस्वतंत्र इव द्विज मदन्यत्ते न जानंति नाहं तेभ्यो मनागपीति ३ अथ त्वदुपासनरूपं भक्ति
योगमनादृत्य केवलाक्षरज्ञाने प्रयत्नं कुर्वंति तेषां परिश्रम एव फलं न त्वन्यदित्याह श्रेयः श्रुतिमिति
हे विभो स्वामिन् श्रेयः श्रुतिं परमनिःश्रेयसरूपमोक्षप्रापिकां भक्तिं प्रीतिरूपमनुध्यानं भक्तिरित्यु
च्यते बुधैरित्युक्तप्रकारेण प्रीतिरूपां भक्तिमुदपास्य अनादृत्य केवलबोधलब्धये केवलप्रत्यगात्म

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ज्ञानप्राप्त्येक्लिश्यंतिप्रयासश्रमंकुर्वंतितेषांतेषांक्लेशलएवशिष्यते अवशिष्यतेनान्यत्किंचिदपि तत्रदृष्टांतः यथा
स्थूलतुषावघातिनां यथासूक्ष्मपरिमाणान्बहुफलान्व्रीहीन्हित्वा अंतःकणहीनान्व्रीह्याभासान्स्थूलतु
षानेवावघ्नंति खंडयंतितेषांक्लेशएवभवतितद्वदिति अत्र क्लेशोधिकतरस्तेषामिति पूर्वोक्तएवेति ॥४॥
अथत्वच्चेष्टत्वज्ञानपूर्वकत्वद्भक्तियोगरसिकास्तु तेनैव भक्तियोगेन त्वांत्वां बहवएव प्राप्ता इत्याह हे भूम
न्बहुगुणविशिष्ट यः सर्वज्ञः सर्ववित् परास्यशक्तिर्विविधैवश्रूयते स्वाभाविकी ज्ञानबलक्रियाचेत्यादि

पुरेह भूमन्बहवोपियोगिनस्त्वदर्पितेहा निजकर्मलब्धया विबुध्य भक्त्यैव कथोपनीतया
प्रपेदिरेंजोच्युतते गतिं परां ५

श्रुतिषुतस्य निरूपाधिककल्याणगुणकत्वंप्रसिद्धमिति इह लोके श्रुतिस्मृतिभिराचार्योपदेशेन त्वच्चेष्टत्वरू
पमात्मानं विबुध्य ज्ञात्वा पश्चाद्भक्त्यैव अंजः साक्षात्ते परां मुक्त्याख्यां गतिं संसारनिवृत्तिपूर्वकत्वत्साम्यरू
पां गतिं प्रपेदिरे प्राप्नुवंतः तथा च श्रुतिः तथा विद्वान्पुण्यपापे विधूय निरंजनः परमं साम्यमुपैती
ति स्मृतिरपि ममसाधर्म्यमागता इत्यादि तथा च भगवद्वाक्यं भक्त्या त्वनन्यया शक्य अहमेवंविधो
र्जुन ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप इति किंविशिष्टया भक्त्या कथोपनीतया त्वत्कथा श्र

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

५
ब्र·स·

वर्णेन प्राप्तया पुनः कीदृश्य निजकर्मलब्धया त्वदाराधनरूपैः स्वस्ववर्णाश्रमकर्मभिः प्राप्तया कीदृश्याक्ते
योगिनः त्वदर्पितेहाः यत्करोषि यदश्नासि यज्जुहोषि ददासि यदित्याद्युक्तप्रकारेण त्वय्यर्पितानि लौकिकवै
5 दिककर्मकलापानि येस्ते ५ अथ यद्यपि अस्यापि देव वपुषो मदनुग्रहस्य स्वेच्छामयस्य न तु भूतमय
स्य कोपि नेशो महित्ववशितुं मनसांतरेण त्युक्तं विषयकलुषितैर्मनः प्रभृतींद्रियैस्तव महिमा ज्ञातुं नश

तथापि भूमन्महिमागुणस्य ते विबोद्धुमर्हत्यमलांतरात्मभिः अविक्रियात्स्वानुभ
वादरूपतो ह्यनन्यबोध्यात्मतया न चान्यथा ६

क्यते तथापि त्वद्दिव्यमंगलविग्रहश्रवणैरत एवाकलुषितैस्तैरेव साक्षात्कर्त्तुमर्हतीत्याह हे भूमन् अनं
ताश्चर्यगुणविशिष्ट तदुक्तं न हि तस्य गुणाः सर्वे सर्वैर्मुनिगणैरपि वक्तुं शक्या वियुक्तस्य स
त्वाद्यैरखिलैर्गुणैरिति अगुणस्य ते प्राकृतगुणरहितस्य ते महिमा महिमानं द्वितीयार्थे प्रथमा
विबोद्धुं ज्ञातुं अमलांतरात्मभिर्वशीकृतमनआदिभिरिंद्रियैरर्हति दृश्यते त्वग्रयया बुद्ध्या सूक्ष्मया सूक्ष्म
दर्शिभिः मनसा तु विशुद्धेन इत्यादिश्रुतेः तथा च ब्रह्मा नारदं प्रति ऋषे विदंति मुनयः प्रशांतात्मेंद्रिया
शया इति नान्यथा च त्वत्कथैर्न तु केनाप्युपायेनेत्यर्थः तत्र हेतुः अविक्रि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

यात् विषयात्मकानींद्रियाणि विकारात्मकानेव पदार्थान् गृह्णंति न त्वत्त्वविकारात्मकत्वात् तथा च परस्त्वाः अविकाराय शुद्धाय नित्याय परमात्मने सदैकरूपरूपाय विष्णवे प्रभविष्णवे इति तत्कुतः स्वानुभवात् स्वीयज्ञानानंदानुभवात् मलिनेंद्रियाणि शब्दादीन्येव विषयीकुर्वंति न तु नित्यज्ञानानंदानुभवस्वरूपं त्वा मित्यर्थः तदपि कुतः यतो रूपतः प्राकृतरूपरहितत्वात् आदित्यवर्णं तमसः परस्तादित्यादिश्रुतेः तदुक्तं मोक्षधर्मे न भूतसंघसंस्थानो देहस्य परमात्मन इति अनन्यबोध्यात्मतयेति स्वप्रकाशकत्वे

गुणात्मनस्तेपि गुणान् विमातुं हितावतीर्णस्य क ईशिरेस्य कालेन यैर्वा विमिताः सुकल्पै र्भूपांशवः खे मिहिका द्युभासः ७

न नान्यैर्बोध्य आत्मा दिव्यविग्रहः स्वरूपं वा यस्य स तस्य भावः तत्ता तया तथा च श्रुतिवाक्यं नाहं वेदैर्न तपसा न दानेन न चेज्यया भक्त्या त्वनन्यया शक्य अहमेवं विधोर्जुनेति ६ गुणात्मनस्तेऽनंतक ल्याणगुणकरस्य तदुक्तं विष्णुपुराणे समस्तकल्याणगुणात्मकोसौ स्वशक्तिलेशाद्धृतभूतसर्गः इच्छागृहीताभिमतोरुदेहः संसाधिताशेषजगद्धितो साविति अस्य विश्वस्य हितावतीर्णस्य हितार्थमवतीर्णस्य तथा चोक्तं श्रुतेनपरीक्षितं प्राति कृष्णमेनमवैहि त्वमात्मानमखिलात्मनां जगद्धिताय सोप्यत्र देही वाभाति मायया इति ते गुणान् विमातुं इयत्तया प्रमातुं क ईशिरे न केपि समर्था आसन्

९
ब्र·स·
6

त्यर्थः ननु बहुकालेन चिरजीविभिः केश्चित्‌ मातुं शक्यमेवेत्यत्राह कालेनेति वाशब्दः संभावनायां सु
कल्पैरतिसमर्थैर्बहुकालजीविभिर्भूपरमाणवो विमिता विमातुं संख्यातुं शक्या भवेयुः तथा खे भि
हिकाहिमकणाद्युतासः दिवि ताराणां किरणपरमाणवो पि गणयितुं शक्या भवेयु न तु तव गुणा
इत्यर्थः तथा च श्रुतिः विष्णोर्नुकं वीर्याणि प्रावोचं यः पार्थिवानि विममे रजांसी त्यादि तथा चै
कादशे द्रमिलवाक्यं वै दे हि प्रति यो वा अनंतस्य गुणाननंताननुक्रमिष्यन् स तु बालबुद्धिः रजांसि

तत्तेनुकंपां सुसमीक्षमाणो भुंजान एवात्मकृतं विपाकं हृद्वाग्वपुर्भिर्विदध
न्नमस्ते जीवेत यो मुक्तिपदे स दायभाक्‌ ८

र्भूमेर्गणयेत्कथंचित्कालेन नैवाखिलशक्तिधाम्न इति ७ तस्मात्त्वद्भक्तिरेव संसारनिवर्त्तिकेत्याह
तत्तेनुकंपामिति तस्मात्कारणात्तेनुकंपां समीक्षमाणः भक्तानुकंपी भगवान् ममोपरि कृपा
कटाक्षं करिष्यत्येवेत्यालोचयन् आत्मकृतं विपाकं स्वप्रारब्धफलं सुखदुःखात्मकं भुंजान
अनुभवं कुर्वाण एव हृद्वाग्वपुर्भिस्ते तुभ्यं नमो विदधत् कुर्वन् यो मुमुक्षुः जीवेत स मुक्तिप
दे दायभाक् भवतीत्यन्वयः यथा नित्या मुक्ता अंश दायादास्तथायमपि भवतीत्यर्थः तथा ९

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

चक्राति: तत्पुरुषो मानवः स एतान् ब्रह्म गमयति ते ह नाकं महिमानः सचंत यत्र पूर्वे साध्याः संति देवाः यथापा
दोदरस्त्वचा विमुच्यते एवं ह वै स पाप्मना विनिर्मुक्तः सामभिरुन्नीयते ब्रह्मलोकं तद्विष्णोः परमं पदं सदा पश्यं
ति सूरय इत्यादि ८ एवं तावत्स्तुतिवाक्यैर्भगवंतं स्तुत्वा अथ तस्मिन्नन्नं ते गुणाकरे भगवति शरणागतदोष
भोग्यत्वं दोषादर्शित्वं वा वात्सल्यमिति तत्क्षणे लक्षितं वात्सल्यगुणं प्राकलय्य तदग्रे स्वापराधरूपं दो
षमाविः करोति पश्येश मे नार्यमिति हे ईश सर्वस्वामिन् मे अनार्यं दौष्ट्यं धाष्ट्र्यमिति यावत् पश्य आश्च

पश्येश मे नार्यमनंत आद्ये परात्मनि त्वय्यपि मायिमायिनि मायां वितत्येक्षितुमात्मवै
भवं ह्यहं कियानैच्छमिवार्चिरग्नौ ९

र्यत्वेनावर्ल्लोकय तदेवाह यो हं अनंते अपरिच्छिन्नमहिम्नि आद्ये सर्वकारणे परात्मनि चिदचिच्छरीरके
मायिमायिनि मायिनामपि मोहके त्वयि मायां स्वमायां वितत्य प्रसार्य आत्मवैभवं अहो अखिलब्रह्माण्डना
यकं भगवंतमपि मोहितवानित्येवं रूपं देवानां श्लाघारूपमैश्वर्यमीक्षितुं द्रष्टुं ऐच्छं इच्छामकार्षं सोहं त्व
न्महिम्नि विचार्यमाणे कियान् कियत्परिमाणः न किमपीत्यर्थः कमिव अग्नौ अर्चिरिव यथा अग्नेः कृत्स्नो
र्चिस्तत्प्रकाशस्तत्प्रकाशयितुं न किमपि समर्थस्तद्वदित्यर्थः ९ एवं स्वापराधं निवेद्य तं क्षमापय

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

५ ति अतइति अतः अपराधस्याज्ञकृतत्वात् त्वदेकभक्तस्य मे क्षमस्व ममोपरि क्षिप्तं मां मोचय मित्रभावेन संप्रा
त्र·स· प्तं न त्यजेयं कथंचन दोषो यद्यपि तस्य स्यात् इति त्वयैवोक्तं हे अच्युत शरणागता यस्मान्न च्यवंति
७ सोऽच्युत इति नामनिर्वचनं अतः क्षमस्व किंच मदुत्पत्तिस्थानं दृष्ट्वा क्षमस्वेत्याह हि यतः रजोभुवः र
जोगुणोत्पन्नस्य तथा च वाराहे अगस्त्यं प्रति रुद्रः नारायणः परो देव इत्यारभ्य रजस्तमोभ्यां युक्तो भूत्
रजः सत्वाधिकं विभुं ससर्ज नाभिकमले ब्रह्माणं कमलासनं रजसा तमसा युक्तं सोऽपि मां ससृजे प्रभुरि

अतः क्षमस्वाच्युत मे रजोभुवो ह्यजानतस्त्वत्पृथगीशमानिनः अजावले
पांधतमोंधचक्षुष एषोऽनुकंप्यो मयि नाथवानिति १०

ति अजानतस्त्वामिति शेषः सर्वशेषिणं त्वामजानत इत्यर्थः अतएव त्वत्पृथगीशमानिनः प्रजाप
तिः प्रजा असृजत इत्यादि श्रुतेः प्रजापतित्वाभिमानवतः अजावलेपांधतमोंधचक्षुषः अजायाः
स्तव शक्तिरूपा मायायाः अवलेपेन संश्लेषेनांधतमो गाढतमस्तेनांधीभूते चक्षुषी नेत्रे यस्य तस्य
कथं क्षांतिः कार्येति चेदत आह मयि नाथवानिति सर्वस्य पितामहत्वेन प्रसिद्धोऽपि मयि सति नाथ
वानयं मन्नाथ इति यावत् इति मनसि विचिंत्य मयानुकंप्यः मम कृपापात्रभूत इति मत्वा क्षमस्वेति भावः १०
॥१॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ननुत्वमपिविराडभिमानीसर्वेश्वरत्वेनप्रसिद्धएवंकिमितिक्षमापयसीत्यतआह क्वाहमिति हेभगवन् तमोम
हदहंखचराग्निवार्भूभिः तमः शब्दवाच्याप्रकृतिः महान्अहंकारः खमाकाशः खचरोवायुः वाजलं तैः संवेष्टितं
यदंडंतदेवघटस्तस्मिन्स्वमानेनसप्तवितस्तिःकायोयस्यइत्थंभूतोहंक्व ईदृग्विधाविगणितान्यसंख्या
तान्यंडान्येवपरमाणवस्तेषांचर्यार्थंपरिभ्रमणार्थंवाताध्वानोगवाक्षाइवरोमविवराणिरोमकूपायस्य
स्यतस्यतवमहित्वंक्वेत्यालोचयदैकदर्शमहदंतरंसूचयतः तदुक्तंअंडकोशोबहिरयंपंचाशत्को

क्वाहंतमोमहदहंखचराग्निवार्भूसंवेष्टितांडघटसप्तवितस्तिकायः क्वेदृग्विधाविगणितांडपरा
णुचर्यावाताध्वरोमविवरस्यचतेमहित्वं ॥ उत्क्षेपणंगर्भगतस्यपादयोः किंकल्पतेमातुर
धोक्षजागसे किमस्तिनास्तिव्यपदेशभूषितंतवास्तिकुक्षेः कियदप्यनंतः ॥

नरा टिविस्तरः दशोत्तराधिकैर्यत्रप्रविष्टः परमाणुवत् लक्ष्यतेंतर्गताश्चान्येकोटिशोह्यंडराशयइति ॥ किंच
ममशिशुत्वात्शिशोरपराधोमात्रेवममापराधस्त्वयाक्षंतव्यइत्याहउत्क्षेपणमिति हेअधोक्षज अधःकृ
तक्षजंइंद्रियजन्यंज्ञानंयस्मात्सतत्संबुद्धौहेअधोक्षजगर्भगतस्यगर्भस्यपादयोरुत्क्षेपणंचालनं
किंमातुरागसेअपराधायकल्पतेयोग्योभवतिनभवतीत्यर्थः ननुगर्भगतस्यपादयोरुत्क्षेपणं

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

८ मानुरागसेमास्तु मम तु त्वं न गर्भगत इत्यत आह किमस्ति नास्तीति अस्तिनास्तिव्यपदेशभूतं सदेकस्वरू
ब्र·स· पतया अनाशित्वादानंदस्वरूपं चिद्वस्तु अस्ति शब्दवाच्यं प्रतिक्षणपरिणामित्वेनावस्थांतरापत्त्या ना
९ शित्वादचिद्वस्तु यत्तन्नास्ति शब्दवाच्यमिति तच्च परब्रह्मणस्त्वच्छरीरभूतं तदुक्तं भगवता पराशरेण अना
शी परमार्थश्च प्राज्ञैरभ्युपगम्यते तत्तु नाशेन संदेहो नाशिद्रव्योपपादितं यत्तु कालांतरेणापि नान्यसं
ज्ञामुपैति वै परिणामादिसंभूतां तद्वस्तु नृपतच्च किमिति कियदपि किंचिदपि तव कुक्षेस्तवोदरात् अ
नंतर्बहिस्त्व्यतिरेकेण किमस्ति नास्त्येवेत्यर्थः सर्वस्य चिदचिदात्मकस्य जगतस्त्वदुत्पन्नत्वात्त्वत्या

जगत्त्रयांतोदधिसंप्लवोदे नारायणस्योदरनाभिनालात् । विनिर्गतोऽस्मीति वा
ग्नवैमृषा किं त्वीश्वर त्वन्न विनिर्गतोऽस्मि १३

न्यत्वात्त्वय्येव लीनत्वाच्चेति भावः तथा च श्रुतिः सर्वं खल्विदं ब्रह्म तज्जलानितीत्यादि अतः सर्वस्य
त्वदात्मकत्वादहमपि त्वदात्मक एवेति तत्त्वमस्येति १२ अपि च सर्वोपि प्रपंचः परंपरया त्वत्तो जातः अ
हं तु साक्षात्त्वत्त एव जात इत्याह जगत्त्रयांतोदधिसंप्लवोद इति जगत्त्रयस्य प्रपंचस्यांते प्रलये उद
धीनां समुद्राणां संप्लव एकार्णवस्तस्मिन्नुदे उदके भोगिभोगशयनस्य नारायणस्योदरे नाभिस्तस्य
नालाद्यजो ब्रह्मा विनिर्गत इति वाक् मृषा न भवतीति निश्चितं हे ईश्वर तथापि त्वन्न विनिर्गतोस्मि ८

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

अपितुत्वत्तएवविनिर्गतइत्यर्थः तथाचमार्कंडेयः स्वपतस्तस्यदेवस्यपद्मं सूर्यसमप्रभं नाभेर्विनिःसृतं
तस्यतत्रोत्पन्नः पितामहइति श्रीमद्रामायणेचब्रह्मवाक्यं श्रीरामचंद्रंप्रति महार्णवेशयानोप्सुमांत्वं
पूर्वमजीजनइति १३ ननुसतुनारायणोजगत्कर्त्ताअन्यःअहंतुगोपबालकइत्यतआह नारायणस्त्वं
नहिकिमितिकाकुः किंतुत्वमेवेत्यर्थः कुतः यतः सर्वदेहिनांजीवानांशरीरभृतानामात्मासि आधारो
अधीशोसिसर्वशोभ्यासि अखिललोकसाक्ष्यसि साक्षात्शुभाशुभद्रष्टासि सर्वफलप्रदइत्यर्थः ननुना

नारायणस्त्वं नहिसर्वदेहिनामात्मास्यधीशाखिललोकसाक्षी नारायणोंऽ
गंनरभूजलायनात् तच्चापिसत्यंनतवैवमाया १४

रायणस्यजलशयित्वात्परिछिन्नत्वेनकथंसर्वात्मकत्वमित्यतआह नारायणोंगमिति नारायणोंगंप
रिछिन्नत्वेनमूर्त्तिरूपः सतुनरभूजलायनात् नराद्भूतानिजलानितेषामयनात् नारायणः न
रशब्दवाच्यत्वमस्यजलेन्द्र नारायणेनरइत्यादौ प्रसिद्धं तदुक्तं आपोनाराइतिप्रोक्ता आपोवैनरसू
नवः अयनंतस्यताः पूर्वंतेननारायणः स्मृतइति तच्चापिसत्यंनकिमितिपुनः काकुः तवजल
शायित्वेनदिव्यविग्रहवत्वमपिसत्यमेवेत्यर्थः किंतु तवैवमायातवैवसंकल्पइत्यर्थः मायावयु
नंज्ञानमित्यनुशासनादत्रमायाशब्दः संकल्पवाची ताअपः सृष्ट्वातासुदिव्यमंगलविग्रहावि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

६ शिष्टः संक्लेते इत्ययं तवैव संकल्प इत्यर्थः तथैव स्वसंकल्पेन सर्वात्मापि तत्रापि प्रमाणांतरं नारायणमयनत्वाद्य
ब्र॰स॰ नारायण इति स्मृतः नारशब्देन जीवानां समूहः प्रोच्यते बुधैः तेषामयनभूतत्वान्नारायण इति स्मृतः नारोन
राणां संघातस्तस्याहमयनं गतिः तेनास्मि मुनिभिर्नित्यं नारायण इति स्मृतः चेतनाचेतनं सर्वं विष्णोर्यद्व्य
१ तिरिच्यते नारं तदयनं चेदं यस्य नारायणस्तु स इति अतः सर्वस्यायनत्वादपि नारायणस्त्वमेवेत्यर्थः १४
तदेवोपपादयति तच्चेदिति हे भगवन् निरुपाधिकज्ञानादिषड्गुणसंपन्न तथा चोक्तं ज्ञानशक्तिबलै
श्वर्यवीर्यतेजांस्यशेषतः भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिरिति तदेव जन्मकाल एव तत्स[illegible]ज
गद्वपुः सकलजगच्छरीरकं जलस्थं तव वपुः किमनेन दृष्टमिति पुनः काकु किंत्वन्तःकरणमलिनत्वात्सा

तच्चेज्जलस्थं तव सज्जगद्वपुः किं मे न दृष्टं भगवंस्तदेव किंवा सुदृष्टं हृदि
मे तदेव किं नो सपद्येव पुनर्व्यदर्शि १५

क्षाद्दर्शनाभावेपि अनुमानेन दृष्टमेव तथा तत्तीये स्वेनैवोक्तं क एष योसावहमब्जपृष्ठ एतत्कुतो वाब्ज
मनन्यदप्सु अस्ति ह्यधस्तादिह किंचनैतदधिष्ठितं यत्र सता नु भाव्यमिति पश्चात्तपसा शुद्धांतःकर
णे सति साक्षादपि दृष्टमित्याह किंवा सुदृष्टमिति किंवाशब्दो पक्षांतरे पुनस्तदेव समाधिरूपतपः
करणानंतरं भगवत्प्रसादात् शुद्धेन मनसा सुदृष्टं तद्रूपं हृदि सपद्येव किं मे न व्यदर्शि दृष्टमेवे
ति अतस्तव दिव्यविग्रहं मलिनसत्त्वानां दृष्टिगोचरं न भवति अप्राकृतत्वात्तस्य तथा चश्रु ६

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

तिः नमांसचक्षुरभिवीक्षते तं न संदृशे तिष्ठति रूपमस्य आदित्यवर्णं तमसः परस्तादित्यादि अतस्तव विग्रहस्यापरि
च्छिन्नत्वापरिच्छिन्नत्वरूपत्वं त्वत्संकल्पायत्तमेवेति भावः तथा च भगवद्वाक्यमर्जुनं प्रति इहैकस्थं जगत्कृत्स्नं
पश्याद्य सचराचरं मम देहे गुडाकेश यच्चान्यद्द्रष्टुमिच्छसि न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा दिव्यं
ददामि ते चक्षुः पश्य मे योगमैश्वरमिति १५ अथ भक्तानां स्वस्य भगवत्प्रसादात्प्रदिव्यं ज्ञानं जातमि
ति जननीं प्रति दर्शितं विश्वरूपं करामलकवत्पश्यन् कथयति हे मायाधमन शरणागतमायाकार्य

अत्रैवमायाधमनावतारे ह्यस्य प्रपंचस्य वहिः स्फुटस्य कृत्स्नस्य चान्त
र्जठरे जनन्या मायात्वमेव प्रकटीकृतं ते १६

संसारनिवर्त्तक तदुक्तं भगवता मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते इति अत्रैवावतारे वहिः स्फु
टस्य प्रसिद्धस्य कृत्स्नस्यास्य प्रपंचस्य जवरस्योदरे जनन्याः प्रदर्शनेनेति शेषः मायात्वं योगै
तेत्वयामा श्वर्यमेव प्रकटीकृतं अतस्त्वमेव सर्वशरीरीत्यर्थः १६ किं च सर्वमिदं जगत्त्वदाधारमे
दर्शितं ४२ वेत्याह यस्य कुक्षाविति हे स्वामिन् यस्य तव कुक्षौ सर्वमिदं विश्वं सात्मं जीवात्मसहितं चेत
नाचेतनात्मकं यथा भाति आधेयतया प्रकाशते तथा तत्सर्वमपि इह बहिरपि त्वय्ये

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

१· त्वदाधारमेव भाति तदिदं मायया। विना किं तव योगैश्वर्यं विना किं किंतु तवकानित्या यो गमा
ब्र·स· यात्तस्याखिलात्मस एव तथा च श्रुतिः अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृज
मानां सरूपाः अजो ह्येको जुषमाणोनुशेते जहात्येनां भुक्तभोगामजोन्य इति तथा परमात्मनो
10 व्याप्तिं दर्शयति अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थित इति १७ तदेवोपपादयति त्वां विना
त्वां मायया विना बिना अस्य प्रपंचस्य मायात्वे अचिंत्ययोगैश्वर्यं त्वया ममापि तद्दर्शितं अद्यैव अस्मि

यस्य कुक्षाविदं सर्वं सात्मं भाति यथा तथा तत्त्वय्यपीह तत्सर्वं किमिदं मायया
विना १७ अद्यैव त्वदृतेस्य किं मम न ते मायात्वमादर्शितं एकोसि प्रथमं ततो
व्रजसुहृद्वत्साः समस्ता अपि तावंतोसि चतुर्भुजास्तदखिलैः साकं मयोपासिता
स्तावंत्येव जगंत्यभूस्तदमितं ब्रह्माद्वयं शिष्यते १८

नैवावसरे किं न दर्शितं दर्शितमेव तदेव दर्शयति प्रथमं त्वं एकोसि कवलपाणिर्नंदसूनु
रेकोसि ततो व्रजसुहृद्वत्साः समस्ताप्यसि पुनस्तावंतश्चतुर्भुजा आसि तेच तदखिलै
र्महदादितत्त्वैः सह मया सहोपासिताः जगंत्यसि अनेनासंख्यातानि ब्रह्मांडान्य १०

पिदृष्टानीतिज्ञायते तत्सर्वं दर्शयित्वा अद्वयं ब्रह्मसमाभ्यधिकरहितं ब्रह्मत्वमेव शिष्यासे अतइदं कृ
६ वलपाणिगोपात्मजत्वरूपयोगैश्वर्यं त्वद्विमुखजनविमोहनार्थमितिज्ञातं मयेति भावः १८ तदेव प्र
पंचयति अजानतामिति त्वत्पदवीं तवाचिंत्ययोगैश्वर्यं अजानतां त्वद्विमुखानां अनात्मनि प्रकृ
तौ तिरस्करणीरूपायां योगमायायां आत्मा आत्मतया स्थितः यस्य प्रकृतिः शरीरं यः प्रकृतौ ति
ष्ठन्नित्यादिश्रुतेः आत्मना उपकरणरहितः स्वेनैव मायां विततय विमुखानामुपरि प्रसार्य तद्

अजानतां त्वत्पदवीमनात्मन्यात्मात्मना भासि वितत्य मायां स्रष्टा
विवाहं जगतो विधान इव त्वमेषोंत इवात्रिनेत्रः १९

त्वं नाहं प्रकाशः सर्वस्य योममाया समावृत इति भासि प्रकाशसे कथं जगतः स्रष्टा इवाहमिव वि
धाने पालने एष मम नेत्रगोचरस्त्वमिव अंते संहारे त्रिनेत्र इवेति अत्र सर्वस्य जगत उत्पत्त्यादिकं सर्वे
श्वरस्त्वमेव करोषि नान्यः किंतु सृष्टिसंहारौ चतुर्मुखरुद्रांतर्यामित्वेन करोषि पालनं तु स्वयमेव
विष्ण्ववताररूपेण करोषि न हि पालनसामर्थ्यमृते सर्वेश्वरं हरिमित्यादिप्रमाणात् तथा च द्वि
तीये ब्रह्मा नारदं प्रति नारायणे भगवति तदिदं विश्वमाहितं गृहीतमायोरुगुणः सर्गादावगुणः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

व्या·स·

स्वतः सृजामि तन्नियुक्तो हं हरो हरति तद्वशः । विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक् १९ अ
नेष्ववताराः साधुपरित्राणार्थं क्रियंते त्याह सुरेष्विति हे ईश अचिंत्यैश्वर्य अजनस्य ज
न्मरहितस्य ते सुरेषु जन्म त्रिविक्रमादि ऋषिषु व्यासादि तथैव नृष्वपि रामकृष्णादि तिर्यक्षु
वाराहादि यादस्सु मत्स्यादि आविर्भावः असतां आसुरसंपद्युक्तानां दुर्मदनिग्रहाय तेषां
प्रशांत्यै हे प्रभो स्वामिन् विधातः जगद्रचक सदनुग्रहाय स्वाश्रितानुग्रहार्थं तदप्युक्तं परि

सुरेष्वृषिष्वीश तथैव नृष्वपि तिर्यक्षु यादस्स्वपि ते जनस्य जन्मासतां दुर्मदनि
ग्रहाय प्रभो विधातः सदनुग्रहाय २० को वेत्ति भूमन् भगवन् परात्मन् योगे
श्वरोतीर्भवतस्त्रिलोक्यां क्वाहो कथं वा कति वा कदेति विस्तारयन् क्रीडसि योगमायां री

त्राणाय साधूनां विनाशाय च दुष्कृतां धर्मसंस्थापनार्थाय संभवामि युगे युगे इति २० अथ ति
र्यगादिषु तवावतारो दुष्कृतनाशपूर्वकं साधुपरित्राणार्थमित्येतावज्ज्ञातं याः तव विभूतयः ताः तु
केपि न जानंति अनंतत्वात्तासामित्याह को वेत्तीति हे भूमन् भूमगुणविशिष्ट भगवन् ऐश्व
रादिगुणाकर परात्मन् परमात्मन् योगेश्वर योगफलप्रद भवतः ऊती विभूती लीला वा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative